# kAlabhairavAShTakaM

# श्रीकालभैरवाष्टकम्

## Document Information

Text title : kaalabhairavaaShTakaM 1-0

File name : kaalabhairava.itx

Category : aShTaka, shiva, shankarAchArya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : Narayanaswami Pallasena at swami at math.mun.ca

Proofread by : Narayanaswami Pallasena, Sunder Hattangadi

Latest update : August 10, 2002, June 20, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 15, 2025

*sanskritdocuments.org*

kAlabhairavAShTakaM

# श्रीकालभैरवाष्टकम्

देवराजसेव्यमानपावनांघ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगंबरं
काशिकापुराधिनाथकालभैरवं भजे ॥ १॥

भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमंबुजाक्षमक्षशूलमक्षरं
काशिकापुराधिनाथकालभैरवं भजे ॥ २॥

शूलटंकपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथकालभैरवं भजे ॥ ३॥

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थितं समस्तलोकविग्रहम् । (स्थिरम्)
विनिक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं (निक्वणन्)
काशिकापुराधिनाथकालभैरवं भजे ॥ ४॥

धर्मसेतुपालकं त्वधर्ममार्गनाशकं (नाशनं)
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णशेषपाशशोभितांगमण्डलं (केशपाश, निर्मलं)
काशिकापुराधिनाथकालभैरवं भजे ॥ ५॥

रत्नपादुकाप्रभाभिरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरंजनम् ।
मृत्युदर्पनाशनं करालदंष्ट्रमोक्षदं (भूषणं)
काशिकापुराधिनाथकालभैरवं भजे ॥ ६॥

अट्टहासभिन्नपद्मजाण्डकोशसंततिं
दृष्टिपातनष्टपापजालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकाधरं
काशिकापुराधिनाथकालभैरवं भजे ॥ ७॥

भूतसंघनायकं विशालकीर्तिदायकं
काशिवासलोकपुण्यपापशोधकं विभुम् । (काशिवासि)
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथकालभैरवं भजे ॥ ८॥

॥ फलश्रुतिः ॥

कालभैरवाष्टकं पठंति ये मनोहरं
ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् ।
शोकमोहदैन्यलोभकोपतापनाशनं (लोभदैन्य)
प्रयान्ति कालभैरवांघ्रिसन्निधिं नरा ध्रुवम् ॥

(ते प्रयान्ति कालभैरवांघ्रिसन्निधिं ध्रुवम् ॥)

॥ इति श्रीमत्परमहंसपरिव्राजकाचर्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छङ्करभगवतः कृतौ
श्री कालभैरवाष्टकं सम्पूर्णम् ॥

This is found in Complete Works of
Shankaracharya, Volume 18, page 89.

There is a similar one in Shivarahasya
aMshaH 11 adhyAyaH 34 . 53-61..

Encoded by Narayanaswami Pallasena at swami@math.mun.ca
Proofread by Narayanaswami Pallasena and Sunder Hattangadi

*kAlabhairavAShTakaM*

pdf was typeset on February 15, 2025

Please send corrections to *sanskrit@cheerful.com*